## स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । (३४/८३१)

भाषितः पुमान् [1]येन समानायामाकृतावेकस्मिन् प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः । [2]तदेतदेवं कथं भवति ? भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते, तस्य प्रतिपादको यः शब्दः सोऽपि भाषितपुंस्कः । ऊङोऽभावः अनूङ, [3]भाषितपुंस्कादनूङ यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनूङ स्त्रीशब्दः । बहुव्रीहिरयम्, अलुग्[4] निपातनात् पञ्चम्याः । तस्य भाषितपुंस्कादनूङः स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवति समानाधिकरणे उत्तरपदे स्त्रीलिङ्गे पूरणीप्रियादिवर्जिते । [5]दर्शनीयभार्यः । श्लक्ष्णचूडः । दीर्घजङ्घः ।

स्त्रिया इति किम् ? ग्रामणि [6]ब्राह्मणकुलं दृष्टिरस्य ग्रामणिदृष्टिः । भाषितपुंस्कात् इति किम् ? खट्वाभार्यः । समानायामा[7]कृतौ इति किम् ? द्रोणीभार्यः । कथं [8]गर्भिभार्यः, प्रसूतभार्यः, प्रजातभार्यः इति ? कर्तव्योऽत्र यत्नः । अनूङ इति किम् ? ब्रह्मबन्धूभार्यः । समानाधिकरणे इति किम् ? [9]कल्याणा माता कल्याणीमाता । स्त्रियाम् इति किम् ? कल्याणी प्रधानमेषाम् कल्याणीप्रधाना [10]इमे । [11]अपूरणी इति किम् ? कल्याणी पञ्चमी [12]यासां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीदशमाः[13] । प्रधानपूरणी[14]ग्रहणं कर्तव्यम् । इह मा भूत्, कल्याणीपञ्चमीकः पक्षः इति । [15]'अप् पूरणीप्रमाण्योः' (५.४.११६/८३२) इत्यत्रापि प्रधानपूरणीग्रहणमेव इत्यप्प्रत्ययो न भवति । अप्रियादिषु इति किम् ? कल्याणीप्रियः ।

प्रिया । मनोज्ञा । कल्याणी । सुभगा । दुर्भगा । भक्ति । [16]सचिवा । अम्बा । कान्ता । क्षान्ता । [17]समा । चपला । [18]दुहिता । [19]वामा । प्रियादिः ।

दृढभक्तिः इत्येवमादिषु स्त्रीपूर्वपदस्याविवक्षितत्वात् [20]सिद्धम् इति समाधेयम् ॥

## तसिलादिष्वाकृत्वसुचः । (३५/८३६)

'पञ्चम्यास्तसिल्' (५.३.७/१९५३) इत्यतःप्रभृति 'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (५.४.१७/२०८५) इति प्रागेतस्माद् ये प्रत्ययाः[21] तेषु भाषितपुंस्कादनूङः स्त्रियाः पुंवद् भवति । तस्याः शालायाः ततः । तस्याम् तत्र । यस्याः यतः । यस्याम् यत्र । तसिलादिषु परिगणनं कर्तव्यम् । त्रतसौ (५. ३. १०/१९५७) (५.३.७/१९५३) । तरप्तमपौ (५.३.५७/२००५) (५.३.५५/२००१) । चरट्जातीयरौ (५.३.५३/१९९९) (५.३.६९/२०२४) । कल्पब्देश्यदेशीयरः (५. ३. ६७/२०२२) । रूपप्पाशपौ (५. ३. ६६/२०२१) (५. ३. ४७/१९९३) । [22]थमुथालौ (५.३.२४/१९७२) (५.३.२३/१९७१) । दार्हिलौ (५.३.१५,१६/१९६४, १९६५) । [23]तिल्तातिलौ (५.४.४१/३५०४) ।

[७२९] शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः । (म.भा. ३.१५५)

---

1. यस्मिन्नर्थे ब.क. 2. तदेतदेवं–सोऽपि भाषितपुंस्कः नास्ति फ. 3. स्त्रियां इत्यधिकम् फ. 4. च इत्यधिकम् ह. 5. शोभनभार्यः ड.फ.ह. 6. कुलं नास्ति फ, ब्राह्मणीकुलं ह. 7. प्रकृतौ ड. 8. गर्भिणीभार्य. फ. प्रसूतभार्यः नास्ति क. 9. कल्याणाः क. 10. ते ब. 11. अपूरण्या इति फ. 12. आसां ह. 13. रात्रयः इत्यधिकम् फ. 14. ग्रहणं नास्ति क. 15. वाक्यमिदं नास्ति फ. 16. सविधा क. 17. नास्ति फ. 18. हिता क. 19. वामना ब.ड.फ.क.ह. 20. प्रसिद्धम् फ. 21. विहिताः इत्यधिकम् फ. 22. थ्यन् ह. 23. तिथ्थ्यनौ ह.